International Journal of Sanskrit Research 2021; 7(4): 153-156

International Journal of Sanskrit Research
अनन्ता

**ISSN: 2394-7519**
IJSR 2021; 7(4): 153-156
© 2021 IJSR
www.anantaajournal.com
Received: 02-05-2021
Accepted: 06-06-2021

**Dr. Dharmendra Das**
Assistant Professor,
P.G. Department of Sanskrit,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha, India

**Corresponding Author:**
**Dr. Dharmendra Das**
Assistant Professor,
P.G. Department of Sanskrit,
Utkal University, Vani Vihar,
Bhubaneswar, Odisha, India

# पाणिनीयसूत्रोदाहरणरूपेण दर्शनशास्त्रीयप्रमाणसिद्धान्त:

**Dr. Dharmendra Das**

**शोधसंक्षिप्तिका**
काणादं पाणिनीयञ्च सर्वशास्त्रोपकारकम् इति विदितमेव सर्वेषाम् । दर्शनशास्त्रे विविच्यमाना: पारिभाषिकशब्दा: पाणिनीयशास्त्रव्याख्याने उदाहरणरूपेण स्वीकृता: वर्त्तन्ते । प्रसङ्गेऽस्मिन् भगवता पाणिनिना प्रणीतानि सूत्राणि परमसहायकानि भवन्ति । व्याक्रियन्ते व्युत्पाद्यन्ते शब्दा: अनेनेति व्याकरणम् नाम शब्दशास्त्रम् । शब्दानाम् अनुशासनं व्याकरणशास्त्रस्य मूलं प्रयोजनम् । अनुशिष्यन्ते अपशब्देभ्य: साधुशब्दा: पृथक्कृत्य ज्ञायन्ते इति शब्दानुशासनम् । इत्थं शब्दानां संस्कार: व्याकरणशास्त्रेण क्रियते । दर्शनशास्त्रे दृष्टा: पारिभाषिकशब्दा: पाणिनीयसूत्रै: संस्कारिता: । तत्र पाणिनीयसूत्रोदाहरणरूपेणागत: दर्शनशास्त्रीय: प्रमाणसिद्धान्त: शोधपत्रेऽस्मिन् विचार्यते ।

**कूट शब्द:** दर्शनशास्त्रे, सर्वशास्त्रोपकारकम्, शब्दशास्त्रम्

## उपक्रम:

दृश्यते ज्ञायते आत्मतत्त्वादिकं येन तत् दर्शनम् उच्यते ।9 दृशिर् प्रेक्षणे" इति धातो: करणे ल्युटि कृते सति दर्शनमिति पदं जायते । करणसाधनमिदं दर्शनपदम् । व्याकरणशास्त्रस्य सम्बन्ध: लोकजीवनेन सह वर्त्तते । परं दर्शनशास्त्रस्य सम्बन्ध: लोकोत्तरजीवनेन सह तिष्ठति । भारतीयदर्शनशास्त्रे समुपलब्धेषु पारिभाषिकशब्देषु प्रमाणम् इति पारिभाषिकशब्द: अन्यतम: । पाणिनीयव्याकरणे 9अस्तिनास्तिदिष्टं मति:" इति सूत्रस्य व्याख्यानावसरे आस्तिक:, नास्तिक: इत्येवमुदाहरणद्वयं प्राप्यते।[१] अस्ति मतिरस्य आस्तिक: । नास्ति मतिरस्य नास्तिक: । तत्र परलोकोऽस्तीति यस्य मतिरस्ति स आस्तिक: । तद्वीपरीतो नास्तिक: । प्रमाणानुपातिनी यस्य मति: स दैष्टिक: भवति । अर्थात् य: वेदपुराणज्योतिषादिप्रमाणानि अनुपतति अनुसरति वा स: दैष्टिक: भवति।[२] पाणिानीयव्याकरणे 9सृजिदृशोर्झल्यमकिति" इति सूत्रस्य व्याख्यानावसरे प्रत्युदाहरणरूपेण दर्शनमिति पदं दृष्टिपथमायाति।[३]

## दर्शनसम्प्रदायेषु प्रमाणस्य विविधता

प्रमाणविषये दर्शनसम्प्रदायेषु मतवैभिन्न्यं परिदृश्यते । प्रत्यक्षमेकमेव प्रमाणमिति चार्वाका: । प्रत्यक्षमनुमानञ्चेति द्वे प्रमाणे वैशेषिकदर्शने प्रतिपाद्येते । प्रत्यक्षमनुमानमागम इति त्रीणि प्रमाणानि साङ्ख्यदर्शने प्रतिपाद्यन्ते । प्रत्यक्षानुमानोपमानशब्दा: इति चत्वारि प्रमाणानि नैयायिकै: स्वीक्रियन्ते। प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धय इति षट् प्रमाणानि सन्तीति भाट्टानां वेदान्तिनाञ्च मतम् । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धि-अभ्यासादृष्टानीति अष्टौ प्रमाणानि च व्याकरणदर्शने चर्चितानि दृश्यन्ते ।

## पाणिनीयसूत्रोदाहरणेषु प्रमाणसिद्धान्त:

प्रमाणं विना कस्यचिदपि प्रमेयस्य सिद्धि: न जायते । तद्वति तत्प्रकारकं ज्ञानं प्रमा । प्रमा क्रियते अनेन इति प्रमाणम् । प्रमाकरणानि एव प्रमाणानि भवन्ति ।काशिकायां 9कृत्यच:" इति सूत्रस्य व्याख्यानावसरे प्रमाणम् इत्युदाहरणं दृष्टिपथमायाति ।[४]9संघे चानौत्तराधर्ये" इति सूत्रस्य व्याख्यानावसरे प्रत्युदाहरणरूपेण प्रमाणसमुच्चय: इति शब्द: प्राप्यते ।[५]

---

१वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. ४.४.६०
२वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. - ७.४.५७
३तत्रैव, सू. सं.-६.१.५८
४तत्रैव, सू.सं.-८.४.२९
५तत्रैव, सू.सं.-३.३.४२

अनुमानादिप्रमाणानां समुदाय: अनेन प्रमाणसमुच्चयशब्देन ध्वनित: भवति । किञ्च प्रमाणसमिच्चय: प्रसिद्ध: दार्शनिक: ग्रन्थ: भवति । ग्रन्थोऽयं बौद्धदार्शनिकेन दिङ्नागेन विरचित: । प्रमातव्यम्, प्रमाता, प्रमातुम् इत्येतानि काशिकागतोदाहरणानि च दर्शनशास्त्रानुमतस्य प्रमाणसिद्धान्तस्य परिचायकानि सन्ति।[६] न्यायवैशेषिकादिदर्शनेषु प्रसिद्ध: प्रमाणशब्द: करणसाधने व्युत्पादित: । तद्यथा-प्रमीयते अनेन इति प्रमाणम् । प्रोपसर्गपूर्वकात् माधातो: ल्युट् प्रत्यये कृते प्रमाणशब्द: निष्पद्यते । प्रमाया: उपलब्धिरेव प्रमाणमिति ज्ञायते । उपलब्धिसाधनानि प्रमाणानि इति न्यायभाष्यकारेण वात्सायनेन सिद्धान्तितम् । काशिकायां पाणिनीयसूत्राणां व्याख्यानावसरे वात्सायानाचार्यस्य नाम नैकवारम् उदाहृतं वर्त्तते ।[७] प्रमाणैरर्थपरीक्षणं न्याय: इति वात्सायनेन न्यायदर्शनस्य व्याख्यानं प्रमाणमूलकम् अङ्गीकृतम् ।[८] काशिकायां न्यायशब्द: उदाहृत: । 9नीयतेऽनेनेति न्याय:" इति काशिकाकारेण व्याख्यात: ।[९] यत्र वस्तुतत्त्वज्ञानाय सर्वेषां प्रमाणानामुपयोग: भवति स: न्याय: । नीयते स्वीक्रियते उपयोग: क्रियते सर्वविधप्रमाणानाम् अनेनेति न्याय: । न्याय: पञ्चाङ्गमधिकरणम् । वात्सायनेनापि पञ्चावयवम् परमन्यायपदेन अभिहितम् । पञ्चावयववाक्येषु सर्वेषां प्रमाणानां समावेश: वर्त्तते । प्रतिज्ञायां शब्दप्रमाणस्य, हेतौ अनुमानस्य, उदाहरणे प्रत्यक्षस्य, उपनये च उपमानप्रमाणस्य समावेश: न्यायपदस्य तात्पर्यं व्यनक्ति । काशिकायां 9परमनिय:" इत्युदाहरणं प्राप्यते ।[१०] परमन्याय:, परमनिय: चेत्यनयो: पदयो: समानाभिप्राय: शाब्दिकै: स्वीक्रियते । प्रमाकरणंप्रमाणमिति लक्षणं नैयायिकै: प्रदीयते ।[११] तत्र प्रमापदस्य करणपदस्य चार्थज्ञानं विना प्रमाणविषयकज्ञानं नैव जायते ।प्रपूर्वकात् माङ् माने इति धातो: आतश्चोपसर्गे इत्यनेन कप्रत्यये स्त्रियाम् अजाद्यतष्टाप् इति टापि सति प्रमा इति पदं निष्पद्यते । काशिकायां प्रमाछन्द:, प्रमाच्छन्द: इत्युदाहरणद्वयं लभ्यते ।[१२] न्यायदर्शने यथार्थानुभव: प्रमाशब्देन व्यपदिश्यते । करणम् इति पदं व्याकरणशास्त्रे प्रसिद्धमेव । 9साधकतमं करणम्" इति पाणिनीयसूत्रमेवात्र मानम् । परन्तु काशिकायां वृत्तौ 9 अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रस्य व्याख्यानावसरे करणम् इत्युदाहरणशब्द: प्राप्यते।[१३]पदमञ्जरीकारेण व्यापारानन्तरं क्रियानिष्पत्ति: करणम् इत्येवं व्याख्यातम् ।[१४] तत्रैव भर्तृहरिमतं टीकाकारेण हरदत्तेन काशिकायाम् उपस्थापितम्। तद्यथा- क्रियाया: परिनिष्पत्तिर्यद्व्यापारादनन्तरम् । विवक्ष्यते यदा तत्र करणं तत्तदा स्मृतम् ।।[१५]

नव्यनैयायिकै: फलायोगव्यवच्छिन्नं करणम् इति सिद्धान्तितम् । अत एव दर्शनशास्त्रेण प्रतिपादित: करणशब्दाभिप्राय: काशिकाव्याख्यानसम्मत: । काशिकायांसाधकतमं करणम् इत्यत्र करणार्थाभिप्रेतम् उदाहरणद्वयं प्रदीयते । यथा- दात्रेण लुनाति, परशुना छिनत्ति ।[१६] इत्थं प्रमाकरणानि प्रमाणानीति सिद्धं भवति । तद्वति तत्प्रकारकं ज्ञानं प्रमा । प्रमा क्रियतेऽनेनेति प्रमाणम्।

**प्रत्यक्षम्**

9अव्ययीभावे शरत्प्रभृतिभ्य:" इति सूत्रस्य व्यख्यानावसरे काशिकायां प्रतिपरसमनुभ्योऽक्ष्ण: इत्येवं गणसूत्रं पठितम् । तत्रैव प्रत्यक्षम् इति उदाहरणशब्द: संगृहीत: ।[१७] प्रति इत्येतस्मात् परस्मात् अक्षिशब्दात् समासान्त: टच्प्रत्यय: भवति । अक्षिणी प्रति प्रत्यक्षम् इति व्याख्यानं क्रियते । येन अक्ष्णोरभिमुखम् इत्यर्थ: लभ्यते प्रत्यक्षपदात् । प्रत्यक्षप्रमाणस्य लक्षणप्रदानावसरे इन्द्रियपदज्ञानम् अपेक्षते ।[१८] काशिकायां इन्द्रियम् इत्युदाहरणं प्राप्यते ।[१९] इन्द्रशब्दात् षष्ठीसमर्थात् लिङ्गम् इत्येतस्मिन्नर्थे घच्प्रत्यये कृते इन्द्रियम् इति पदं जायते ।इन्द्रस्य लिङ्गम् इन्द्रियम् । इन्द्र: आत्मा उच्यते । स: चक्षुरादिना करणेनानुमीयते, नाकर्तृकं करणमस्तीति काशिकाकारेण व्यख्यातम् । विषयान् ज्ञातुम् आत्मा चक्षुरादीन्द्रियं सेवते । इत्थम् इन्द्रियविषयकं रोचकतथ्यं काशिकायां प्रतिपादितम् ।

**अनुमानम्**

9विषाषा गुणेऽस्त्रियाम्" इति सूत्रस्य व्याख्यानावसरे काशिकाव्याख्याकारेण पदमञ्जरीकारेण सूत्रस्य योगविभागं प्रदर्श्य9पर्वतो वह्निमान् धूमवत्त्वात्" इति दर्शनशास्त्रीयं प्रसिद्धम् उदाहरणं संगृहीतम् ।[२०] उदाहरणमिदम् अनुमानप्रमाणस्येति स्वीक्रियते । प्रसङ्गेऽस्मिन् जाड्याद्बद्ध:, पाण्डित्याद् मुक्त: इत्येवमुदाहरणद्वयं तत्रैव संगृहीतम् । एतदुदाहरणद्वयमपि 9पर्वतो वह्निमान् धूमवत्त्वात्" इत्युदाहरणवत् स्वीकर्तुं शक्यते ।9द्वितीये चानुपाख्ये" इति सूत्रस्य व्याख्यानावसरे प्रत्यक्षानुमानयो: प्रकृतोदाहरणानि प्रदीयन्ते । तत्रोच्यते उपाख्यायते उपलभ्यते य: स उपाख्य:,उपाख्यादन्योऽनुमेय: । साग्नि: कपोत:, सपिशाचा वात्या, सराक्षसीका शाला इत्येतानि उदाहरणानि अनुमानप्रमाणगम्यानि।[२१] अनुमानप्रमाणस्य कृते काशिकायाम् 9अनुपाख्य:" इति पदम् अभिहितम् । अग्न्यादय: न क्वचित् प्रत्यक्षेण उपलभ्यन्ते, अपि तु कपोतादिभिरविनाभाविभिरनुमीयन्ते ।

**उपमानम्**

सादृश्यज्ञानकरणकं ज्ञानम् उपमानप्रमाणमिति सिद्धान्त: वर्त्तते ।[२२]प्रसिद्धसाधर्म्यात् साध्यसाधनमुपमानम् इति न्यायदर्शने प्रतिपाद्यते ।[२३] काशिकायाम्9उपमानानि सामान्यवचनै:" इति सूत्रस्य व्याख्यानावसरे उपमानशब्द: आदौ व्याख्यात: काशिकाकारेण । उपमीयतेऽनेनेत्युपमानम् । उपपूर्वान्माङ: करणे ल्युटि कृते उपमानपदं जायते । उपपूर्वकश्च माङ् सादृश्यहेतुके परिच्छेदे रूढ:। सादृश्येन येन परिच्छिद्यते तदुपमानमित्यर्थ: । यथा गौरिव गवय इत्यत्र गौरुपमानम्, तेन हि सादृश्येन गवय: परिच्छिद्यते । यादृशो गौस्तादृशो गवय: इत्यर्थ: प्रतीयते ।[२४]इत्थम् उपमानप्रमाणविषयकं रोचकतथ्यं सूत्रव्याख्यानावसरे काशकिायां वृत्तौ दृष्टिपथमायाति ।

**शब्द:**

शब्दप्रमाणविषये य: पृच्छति स: शब्दप्राट् इत्युच्यते । काशिकायां शब्दप्राट् इत्युदाहरणं प्राप्यते । शब्दं पृच्छतीति शब्दप्राट् ।[२५] शब्दप्रमाणं नामान्तरेण आप्तप्रमाणमित्यभिधीयते। काशिकागतम् आप्त: इत्युदाहरणमस्य परिचायकमस्ति ।[२६] आप्तोपदेश: शब्द: इति न्यायभाष्ये प्रतिपादितम् ।[२७] आप्तोक्तं वाक्यमेव प्रमाणमुच्यते । पदज्ञानकरणं ज्ञानमेव शब्दप्रमाणम् अस्ति । पदज्ञानकरणत्वे सति

---

६तत्रैव, सू.सं. -६.१.५०

७तत्रैव, सू.सं.-४.१.९४/४.१.१०१/४.१.१६३/४.१.१६५/६.४.१५१

८न्यायभाष्य.-१.१.१

९वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. ३.३.१२२

१०वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं.–६.४.८२

११प्रमाकरणं प्रमाणम् तच्च प्रत्यक्षानुमानं चोपमानं शब्दश्चेति भेदाश्चतुर्विध इत्यर्थ: -न्या.सू.३, पृ.३-४

१२वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. -६.१.७४

१३वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं.-८.४.२

१४वामनजयादित्यविरचिता काशिकावृत्ति:, भाग.१,पदमञ्जरी-पृ.१५३

१५वाक्यपदीयम्-३.७.९०

१६वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं.–१.४.१२

१७वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. -५.४.७

१८इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारि व्यवसायात्मकं प्रत्यक्षम्—न्या.सू.१.१.४

१९वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं.–५.२.९३

२०वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. २.३.२५, द्रष्टव्य: -पदमञ्जरीव्याख्या

२१अग्न्यादय: साक्षादनुपलभ्यमाना: कपोतादिभिरनुमीयमानास्तदुपाख्या भवन्ति ।-वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं.- ६.३.८०

२२उपमितिकरणमुपमानम् । तत्करणं सादृश्यज्ञानम् ।- तर्कसंग्रह:, पृ.८५

२३न्यायसूत्र.-१.१.६

२४वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. -२.१.५५

२५तत्रैव, सू.सं.-३.२.१७८

२६थत्रैव, सू.सं.-३.१.२०५

२७आप्त: खलु साक्षात्कृतधर्म्मा यथादृष्टस्यार्थस्य चिख्यापयिषया प्रयुक्त उपदेष्टा – न्या.भा.सू.-७

शाब्दत्वम् उच्यते । अयमेव शाब्दबोधः इत्युच्यते । व्याकरणदर्शने शब्दप्रमाणं चर्चितं वर्त्तते। काशिकायां शाब्दिको वैयाकरणः इत्येवमुदाहरणं प्राप्यते ।[२८] शब्दं करोति जानातीति शाब्दिकः । करोतिरिह ज्ञाने वर्त्तते, प्रकृत्यादिविभागेन जानातीत्यर्थः ।

**अर्थापत्तिः**

मीमांसादर्शनाभिमतमिदमर्थापत्तिप्रमाणम् ।[२९] अद्वैतवेदान्तिनश्च पृथक्तया अर्थापत्तिप्रमाणं स्वीकुर्वन्ति। तत्रोपपाद्यज्ञानेनोपपादककल्पनमर्थापत्तिः । अद्वैतवेदान्तदर्शने प्रमाणमिदं द्विधा विभक्तं वर्त्तते । दृष्टार्थापत्तिः श्रुतार्थापत्तिश्चेति ।शुक्तौ रजतज्ञानम् दृष्टार्थापत्तिप्रमाणस्य उदाहरणम् । पीनोऽयं देवदत्तः दिवा न भुङ्क्ते इति श्रुतार्थापत्तिप्रमाणस्य उदाहरणमस्ति । काशिकावृत्तौ पाणिनीयसूत्रव्याख्यानावसरे अर्थापत्तिप्रमाणनिष्ठोदाहरणानि प्राप्यन्ते । काशिकागतमेकं श्लोकोदाहरणं यथा-

> विना वातं विना वर्षं विद्युत्प्रपतनं विना ।
> विना हस्तिकृतान् दोषान् केनेमौ पातितौ द्रुमौ ।।[३०]

9पीनोऽयं देवदत्तः दिवा न भुङ्क्ते" इति उदाहरणवत् काशिकागतमुदाहरणमिदं श्रुतार्थापत्तिप्रमाणस्य भवितुमर्हति ।काशिकागतम्आश्चर्यम्, अन्धो नाम पर्वतमारोक्ष्यति, आश्चर्यम्, बधिरो नाम व्याकरणमध्येष्यते इत्येवमुदाहरणद्वयं दृष्टार्थापत्तिप्रमाणस्य परिचायकमस्ति ।[३१] एवञ्च काकपेया नदी, श्वलेह्यः कूपः इत्येवं काशिकागतम् उदाहरणद्वयं दृष्टार्थापत्तिप्रमाणस्य भवितुमर्हति ।[३२] स्तुतिनिन्दाप्रयुक्तोऽध्यारोपितः अर्थवचनः द्वाभ्याम् उदाहरणाभ्यां समुपजायते । पूर्णतोया नदी यत्तटस्थैः काकैरपि शक्या पातुमिति स्तुतिः, एवम् अल्पतोयः कूपस्तटस्थैरपि श्वभिः शक्यः लेढुमिति निन्दा । किञ्च बाष्पच्छेद्यानि तृणानि, कण्टकसञ्चेय ओदनः इत्येवमुदाहरणद्वयमपि तत्रस्थं दृष्टार्थापत्तेरित्याकलयितुं शक्यते । कोमलानि तृणानि यद्बाष्पेणापि छेत्तुं शक्यानीति स्तुतिः । क्वथितानि तृणानि यद्बाष्पेणापि छेत्तुं शक्यानीति निन्दा क्लिन्न ओदनः यत्कण्टकैः संचेतुमिति स्तुतिः। एवम् अल्प ओदनः यत्कण्टकैः संचनीय इति निन्दा ।9आश्चर्यो गवां दोहोऽगोपालकेन" इति काशिकागतमुदाहरणं दृष्टार्थापत्तिप्रमाणस्य अन्यतमं प्रकृष्टोदाहरणमस्ति ।[३३]मीमांसादर्शने श्रुतार्थापत्तिप्रमाणस्यापि भेदद्वयं प्रतिपाद्यते । अभिधानापपत्तिः अभिहितानुपपत्तिश्चेति । यदा कस्यचित् वाक्यावयवस्य श्रवणानन्तरं तस्य तात्पर्यान्वये वाधा जायते, तदा तात्पर्यान्वयार्थं कस्यचिद् अपरस्य वाक्यावयवस्य परिकल्पनं क्रियते । यथा, पिधेहि इति वाक्यावयवं श्रुत्वापि तात्पर्यान्वयाभावे तत्र द्वारं पिधेहि इति परिकल्पनं भवति । उदाहरणमिदम् अभिधानापपत्तिप्रकारस्य श्रुतार्थापत्तिप्रमाणस्येति स्वीक्रियते । काशिकागतं 9गोभिर्वपावान्" इत्युदाहरणम् अभिहितानुपपत्तिप्रकारस्य श्रुतार्थापत्तिप्रमाणस्य ।[३४] गोसम्बन्धिदध्यादिपानेन तस्य वपावत्त्वमित्येवम् अभिहितानुपपत्तिः । अभिहितानुपत्तिः नाम वाक्यनिष्ठस्यार्थस्य अभिहितत्वे सति अर्थान्तरस्य परिकल्पनम् ।

**अनुपलब्धिः**

अद्वैतवेदान्तदर्शनाभिमतं प्रसिद्धमिदम् अनुपलब्धिप्रमाणम् । प्रत्यक्षादिप्रमाणानाम् अभावः एव अनुपलब्धिप्रमाणम् उच्यते ।[३५] अनुपलब्धिप्रमाणेन कस्यचित् पदार्थस्य अभावज्ञानं भवति । ज्ञानमिदम् अनुभवात्मकं न तु स्मृतिमूलकमस्ति । प्रत्यक्षानुमानोपमनादिप्रमाणैः ज्ञानमिदं नैवावाप्यते। उपलब्धिः नाम ज्ञानम् । तस्याः उपलब्धेः अभावः अनुपलब्धिः ।प्रतियोगिज्ञानाधीनज्ञानविषयत्वम् अभावत्वम् । घटाभाववत् भूतलम् इति प्रसिद्धम् उदाहरणम् अनुपलब्धिप्रमाणस्य । भूतले घटः नास्ति ।अत्र घटाभावस्य प्रतियोगी घटः अस्ति । प्रतियोगिनः घटस्य भूतले अभावात् अत्र घटाभावोऽस्ति । अतः घटाभावस्य ज्ञानं तस्य प्रतियोगिनः घटज्ञाने आधारितमस्ति । इत्थम् अभावपदार्थनिरूपणावसरे वैशेषिकदर्शने पर्यालोचितम् । काशिकायां निर्मक्षिकम्, निर्मशकम् इत्येवमुदाहरणद्वयं प्राप्यते ।[३६] वस्तुनः अभावः अर्थाभावः इत्येवं काशिकाव्याख्यानम् । अर्थाभावः कालानवच्छिन्नोऽभाव आश्रीयते।9विभाषा गुणेऽस्त्रियाम्" इति सूत्रस्य व्याख्यानावसरे न्यासकारेण विभाषा इति योगविभागः प्रदर्शितः । तत्र योगविभागबलेन 9नास्तीह घटोऽनुपलब्धेः" इत्युदाहरणं सिद्धं भवति।[३७] काशिकागतम् अनुपलब्धिप्रमाणविषयकमिदं समुज्ज्वलमुदाहरणम् अस्ति । घटाभावबोधः अनुपलब्धिप्रमाणाधीनः ।

**ऐतिह्यम्**

पौराणिकाः ऐतिह्यप्रमाणम् अङ्गीकुर्वन्ति । तेषां मतेन इतिहाससम्बन्धाः नैके विषयाः साम्प्रतिककाले प्रमाणत्वेन स्वीक्रियन्ते । ते विषयाः प्रामाणिकाः भवन्ति । एते प्रामाणिकाः विषयाः ऐतिह्यप्रमाणेन स्वीकृताः भवन्ति । काशिकावृत्तौ सूत्रव्याख्यानावसरे उदाहृताः शब्दाः ऐतिहासिकाः । प्राचीनेतिहासस्य सम्यक् ज्ञानं ऐतिह्यप्रमाणधीनमस्ति । त्रिमुनिकालात् प्राक् विद्यमानानां वैयाकरणानां नामानि काशिकोदाहरणेषु प्रतिफलितानि दृश्यन्ते । शाकटायनव्याकरणं पाणिनीयव्याकरणात् प्राचीनतरमिति मन्यन्ते विद्वांसः । 9अनुशाकटायनं वैयाकरणाः",[३८]9उपशाकटायनं वैयाकरणाः"[३९] इत्येवमुदाहरणद्वयं वैयाकरणस्य शाकटायनस्य उत्कृष्टतां प्रतिपादयति । महाभारते अर्जुनः प्रकृष्टतमः योद्धा इति प्रतिपादनपरकम् उदाहरणमपि तत्रैव प्राप्यते।[४०] अनुरूपं प्राचीनोदाहरणम् 9ब्रह्मदत्ते पञ्चालाः"इति 9अधिरीश्वरे"[४१] इति सूत्रस्य व्याख्यानावसरे प्राप्यते । अस्योदाहरणस्य पश्चात् प्रसिद्धा कथैका वर्त्तते इति ज्ञायते । तदित्थं यत्, पाञ्चालदेशस्य राजधानी आसीत् काम्पिल्यः । तत्र ब्रह्मदत्तनामकः राजा शासनं करोति स्म ।[४२] ऐतिह्यप्रमाणरूपेणैव प्राचीनैतिह्यस्य अवबोधः जायते । काशिकायाम् एकस्य विशेषप्रकारस्य शुकस्य 9माराविदः" इति प्राचीनं नाम उदाहरणरूपेण आयाति । तद्यथा- कच्चिज्जीवति ते माता कच्चिज्जीवति ते पिता । माराविद त्वां पृच्छामि कच्चिज्जीवति पार्वती ।।[४३]

**सम्भवः**

सम्भवत्यस्मिन्निति सम्भवः । इदमपि प्रमाणं पौराणिकाभिमतम् । यत्र यः सम्भवतीति ज्ञानं सम्भवप्रमाणाधीनम् । पौराणिकाः महाकाशे घटाकाशं मठाकाशञ्च सम्भावयन्ति ।9विभाषा धातौ संभावनवचनेऽयदि" इति सूत्रस्य व्याख्यानावसरे

२८वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं. -४.४.३४

२९ अर्थापपत्तिरपि दृष्टः श्रुतो वार्थो अन्यथा नोपपद्यते इत्यर्थकल्पना यथा जीवितो देवदत्तस्य गृहाभावदर्शनेन बहिर्भावस्य अदृश्यकल्पना-शाबरभाष्य,पृ.११०

३०वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं.– २.३.३२

३१तत्रैव, सू.सं.-३.३.१५१

३२तत्रैव, सू.सं.-२.१.३३

३३तत्रैव, सू.सं.-२.२.१४

३४वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं. -२.१.३०

३५ज्ञानकरणाजन्याभावानुभवासाधारणकारणानुपलब्धिरूपं प्रमाणम् –वेदान्तपरिभाषा, अनुपलब्धिपरिच्छेदः

३६वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं.– २.१.६

३७तत्रैव, सू.सं.-२.३.२५

३८वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं. १.४.८६

३९वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं. १.४.८७

४०तत्रैव, अन्वर्जुनं योद्धारः। -सू.सं.-१.४.८७

४१वामनजयादित्यविरचिता काशिकावृत्तिः, सू.सं. १.४.९७

४२ स्वप्नवासवदत्तम्(मदनगोपालबाजपेयीसम्पादितम्), पञ्चमाङ्कः, पृ.१४६

४३माराविशब्दं ददातीति माराविदः, माराविं रवो माकारीत्यर्थः । संज्ञैषा शुकविशेषस्य, तं हस्ते निधाय कश्चिल्लालयति–का.वृ.३.३१५३

सम्भवप्रमाणस्य उदाहरणानि प्राप्यन्ते । यथा- सम्भावयामि भुञ्जीत भवान् । सम्भावयामि भोक्ष्यते भवान् ।[४४] सम्भावनमुच्यते येन स सम्भावनवचन: इत्येवं काशिकाकारेण व्याख्यातम् । किञ्च 9संभावनेऽलमिति चेत्सिद्धाप्रयोगे" इति सूत्रस्य व्याख्यानावसरे पदमञ्जरीकारेण सम्भवस्य व्याख्यानं प्रतिपादितम् ।[४५] सम्भावनं भाविवस्तूत्प्रेक्षणमित्यर्थ: । प्रसङ्गेऽस्मिन् अपि पर्वतं शिरसा भिन्द्यात्, अपि द्रोणपाकं भुञ्जीत इत्येवमुदाहरणद्वयं तत्रस्थं सम्भवप्रमाणस्य परिचायकम् ।

**उपसंहार:**

दर्शनशास्त्रीय: प्रमाणसिद्धान्त: पाणिनीयव्याकरणे उदाहरणपदै: सुसमृद्ध: सञ्जात: । दर्शनशास्त्रे विचारितानि विविधानि प्रमाणानि पारिभाषिकशब्दरूपेण पाणिनीयशास्त्रे व्युत्पादितानि । प्रमाणसिद्धान्तमतिरिच्य पाणिनीयव्याकरणे संगृहीता: नैके उदाहरणशब्दा: भारतीयदर्शने चर्चिता: वर्त्तन्ते। दर्शनशास्त्रीयसिद्धान्तेषु एवम्भूता: शब्दा: व्यवहृता: सन्त: भाषिकव्यवहारेष्वपि संरक्षिता: आसन् । भाषायां दार्शनिकविचार: सर्वतोभावेन प्रतिफलित: आसीदिति पाणिनीयशास्त्रं ज्ञापकं भवति । पाणिनीयसूत्रोदाहरणरूपेण दर्शनशास्त्रीयोऽयं प्रमाणसिद्धान्त: बहुमुखिशोधक्षेत्रे संस्कृतं विहाय इतरशास्त्रगवेषणाक्षेत्रे प्रवृत्तानां गवेषकानां कृतेऽपि महोपकारक: भवेत् ।

**सहायकग्रन्थसूची**


1. अष्टाध्यायीसूत्रपाठ: श्रीनारायणमिश्रसम्पादित:, चौखम्बा-ओरिएण्टालिआ, वाराणसी, १९७७
2. काशिका (भागदशात्मिका) वामनजयादित्यविरचिता, जयशङ्करलालत्रिपाठिना सुधाकरमालवीयेन च सम्पादिता, ताराबुक्एजेन्सी, वाराणसी, १९८५
3. स्वप्नवासवदत्तम्महाकविभासप्रणीतम्, मदनगोपालबाजपेयीसम्पादितम्, भारतीय विद्याप्रकाशन, दिल्ली, पञ्चमसंस्करणम्-२००२
4. वेदालंकार, जयदेव, भारतीय दर्शन (तत्त्वऔर ज्ञानमीमांसाकेमौलोक सम्प्रत्यय), न्यू भारतीय बुककांर्पोरेशन, दिल्ली, २००१
5. Joshi KL. (Ed.), *Sarva-darśana-sangraha* of *Mādhavāchārya* (Sanskrit text-English translation-notes), Translated by E.B. Cowell and A.E. Gough, Parimal Publications, Delhi 1986.
6. Sinha Nanda Lal. (Ed.), The *Nyāyasūtra* of Gotam, Translated by M.M. Satisa Chandra Vidyābhuṣaṇa, Motilal Banarasidass, Delhi 1981.
7. Virupakshananda Swami. (Translated), *Tarkasaṁgraha* with the *Dīpikā* of *Aṇnambhaṭṭa* and Notes, Sri Ramakrishna Math, Mylapore, Madras 1994.


४४ वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. ३.३.१५५

४५ तत्र यथा घट इति ज्ञानं पट इति ज्ञानमित्युक्ते ज्ञानस्य विषयनिर्देश: प्रतायते, तथेहापि सम्भावनाख्यास्य ज्ञानस्य विषयनिर्देश: । - वामनजयादित्यविरचिता काशिकावृत्ति:, सू.सं. -३.३.१५४